# Samskrita Bhasha nIrAjanA AratI

# સંસ્કૃતભાષા-નીરાજના (આરતી)

## Document Information

Text title : Sanskrita Bhasha NirAjana Arati

File name : saMskRRitabhAShAnIrAjanA.itx

Category : AratI, misc, sahitya, sanskritgeet

Location : doc_z_misc_general

Transliterated by : Rishbha Bhagi

Proofread by : Rishbha Bhagi

Latest update : December 28, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 28, 2022

*sanskritdocuments.org*

# સંસ્કૃતભાષા-નીરાજના (આરતી)

જય સંસ્કૃતભાષે, જય સંસ્કૃતભાષે,
કુરુ કરુણાં કરુણાર્દ્રે, કુરુ કરુણાં કરુણાર્દ્રે, ત્વચ્છરણે દાસે ॥ જય ॥ ધ્રુ.॥

વેદા ભગવદ્ગીતા ઉપનિષદઃ સર્વાઃ, ઉપનિષદઃ સર્વાઃ
તવ વૈ દિવ્યશરીરં, તવ વૈ દિવ્યશરીરં યૈસ્ત્વં સદ્ધર્વા ॥ જય ॥ ૧
કપિલપતઞ્જલિશઙ્કરગોતમકણમુગ્ભિઃ, ગોતમકણમુગ્ભિઃ,
જૈમિનિમુખ્યૈર્મુનિભિઃ જૈમિનિમુખ્યૈર્મુનિભિરિષ્ટા બહુસદ્ભિઃ ॥ જય ॥ ૨
વ્યાસઃ કાલીદાસો ભારવિકવિબાણૌ, ભારવિકવિબાણૌ-
ભવભૂતિર્ભવભૂતિઃ, ભવભૂતિર્ભવભૂતિઃ, ભાસશ્રીહર્ષો ॥ જય ॥ ૩
કોઽન્યો લોકે યો વૈ સમતામેષાં કુરુતામ્, સમતામેષાં કુરુતાં
વાલ્મીકિશ્ચ સુબન્ધુઃ, વાલ્મીકિશ્ચ સુબન્ધુઃ, ક્વાન્યસ્યામાસ્તે ॥ જય ॥ ૪
વેદૌ જ્યોતિર્ધનુષોઃ પુનરાયુર્વેદઃ પુનરાયુર્વેદઃ-
અતુલરસાયનશાસ્ત્રં, અતુલરસાયનશાસ્ત્રં કસ્તુલયેલ્લોકે ॥ જય ॥ ૫
કિં તચ્છાસ્ત્રં લોકે ન ત્વં યન્મૂલં, ન ત્વં યન્મૂલં,
નાસ્તિ જગદ્ધિતકારિણિ, નાસ્તિ જગદ્ધિતકારિણિ, જનસુખમનુકૂલમ્ ॥ જય ॥ ૬
વિશ્વસ્મિન્ વિશ્વેઽસ્મિન્ શાન્તિશ્ચેન્મૃગ્યા, શાન્તિશ્ચેન્મૃગ્યા-
ત્વચ્ચરણૌ હિત્ત્વા નો, ત્વચ્ચરણૌ હિત્ત્વા નો ગતિરિહ જનવાસે ॥ જય ॥ ૭
જનિમરણાદ્ભુતદુઃખૈઃ પરિપૂર્ણે ભુવને, પરિપૂર્ણે ભુવને
તવ ચરણૌ કિલ શરણં, તવ ચરણૌ કિલ શરણં સ્યાતામાશાસે ॥ જય ॥ ૮
વયમપિ ભવભયભીતા ભી-તાપહ-રૂપામ્, ભી-તાપહ-રૂપામ્-
ત્વાં શરણં પ્રાપ્તાઃ, કુરુ ત્વાં શરણં પ્રાપ્તાઃ, કુરુ કરુણાં કરુણાર્દ્રે ॥ જય ॥ ૯
ત્યક્ત્વા ખર્વં કૂપં જલનિધિરુપસેવ્યઃ, જલનિધિરુપસેવ્યઃ-
વિશ્વે વિશ્વજના ઇહ, વિશ્વે વિશ્વજના ઇહ સાદરમર્થ્યન્તે ॥ જય ॥ ૧૦
રામઃ પરશુસપૂર્વોઽપૂર્વૈઃ સ્તુતિદીપૈઃ, માતઃ સ્તુતિદીપૈઃ-
આરાર્ત્તિક્યં કુર્વન્, આરાર્ત્તિક્યં કુર્વન્ ત્વચ્ચરણૌ શ્રયતે ॥ જય ॥ ૧૧

રચયિતા પરશુરામઃ

શાસ્ત્રી, વ્યાકરણાચાર્યઃ, પુરા જમ્બૂનગરસ્થ-શ્રીરઘુનાથસંસ્કૃતમહાવિદ્યાલયસ્ય)

Encoded and proofread by Rishbha Bhagi

---

*Samskrita Bhasha nIrAjanA AratI*

pdf was typeset on December 28, 2022

Please send corrections to *sanskrit@cheerful.com*